# पर्याय–शैक्षणिककार्ययोजना –2021–22

**नवमीकक्ष्या (IX Standard)** **फेब्रुवरिमासः (February-22)**

| क्रम सङ्ख्या | मासः / सप्ताहः Month / week | अधिगमफलानि Learning out come | निर्देशात्मक क्रियाकलापाः Activity | मौल्यमापन– क्रियाकलापाः Evaluation activity |
|---|---|---|---|---|
| 1 | **फेब्रुवरिमासः– (February) –2022** | | | |
| | **प्रथमसप्ताहः (1st week)**<br>क्रियाकलापः–1 | **गद्यम्–सौभद्रो ग्रहणं गतः ।**<br>❖ काव्येषु नाटकं रम्यम् इति अवगच्छन्ति ।<br>❖ दृश्य–श्रव्यमाध्यमेषु नाटकं अतीव –प्रभावशाली वर्तते ।<br>❖ नाटकं जनान् प्रेरयति।<br>❖ महाभारतस्य किञ्चित्परिचयं प्राप्नुवन्ति ।<br>❖ गोग्रहणवृत्तान्तस्य ज्ञानं प्राप्नुवन्ति । | ➢ अभिनयद्वारा रूपकस्य बोधनम् ।<br>➢ स्वरभारसहितं सम्भाषण–संवहनकौशलवृद्धिः ।<br>➢ छात्राः नाटकपात्राणि चयनं कृत्वा अभ्यस्यन्ति ।<br>➢ नाटकस्य अभिनयं कुर्वन्ति । | ▪ अभिमन्योः पात्रचित्रणं कुर्युः ।<br>▪ भगवद्गीताविषये लिखत। |
| | क्रियाकलापः–2 | ❖ दशरूपकाणां विषये ज्ञानप्रदानम् ।<br>❖ साहित्य–नृत्य–गीत–अभिनयादि कलाः नाटके अन्तर्भवन्ति ।<br>❖ नट्यते रूप्यते इति रूपकम् । | ➢ विभिन्नसंस्कृतनाटकानां विषये वक्तव्यम् ।<br>➢ समाजस्य उपरि नाटकस्य परिणामस्य अध्ययनम् । | ▪ दशरूपकाणि कानि ?<br>▪ दशरूपकस्य कार्ता कः ? |
| | क्रियाकलापः–1 | ❖ **व्याकरणपाठः – अनुवादः ।**<br>❖ अनुवादस्य वैविध्यम् अस्तीति वक्तव्यम् । भेदाः–<br>❖ भावानुवादः<br>❖ वाक्यानुवादः<br>❖ शब्दानुवादः ।<br>❖ अनुवादस्य आवश्यकता प्रयोजनस्य च | ➢ प्राथमिकस्तरे शब्दानुवादः एव उत्तमः इति अध्यापकः छात्रान् प्रेरयेत्।<br>➢ अग्रिमस्तरेषु वाक्यानुवादं भावानुवादं वा कर्तुं प्रेरयेत् ।<br>➢ भावानुवादः एव उत्तमः क्रमः इति अवगमयेत् ।<br>➢ छात्राः आचार्येण प्रेरणां प्राप्य स्वयं विविध– | ▪ कर्णाटकभाषया अनुच्छेदं स्वीकृत्य अनुवादं कुर्युः ? पाठ्यपुस्तके विद्यमान–अनुवादवाक्यानि भाषान्तरं कुर्युः । |

| | | | | |
|---|---|---|---|---|
| | | विवरणम् ।<br>❖ अनुवादेन वक्तुः भावः ज्ञायते इत्यादीन् विषयान् छात्राः अवगच्छन्ति । | अनुवादं कर्तुम् प्रयतेरन् । | |
| | **द्वितीयसप्ताहः (2nd week)**<br>क्रियाकलापः–1 | **पूरकपाठः– धर्मो रक्षति रक्षितः –**<br>❖ महाभारतस्य वैशिष्ट्यम् अभिजानन्ति ।<br>❖ कौरव–पाण्डवयोः कथां स्मारयन्ति ।<br>❖ 'यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्' इति महाभारतस्य उक्तिं वर्णयेत् । | ➢ महाभारतस्य ऐतिहासिकमहत्त्वम् अवगमयेत् ।<br>➢ धर्मराजस्य धर्मनिष्ठताम् अवगम्य सद्गुणान् स्वयं पालयेत् ।<br>➢ धर्मराजः यक्षं प्रति उक्त विषये छात्राः स्वयं चर्चां कुर्वन्तु । | ▪ माहाभारतस्य कर्ता कः?<br>▪ महाभारतस्य लिपिकारः कः ?<br>▪ कति पाण्डवाः आसन्? |
| | क्रियाकलापः–2 | ❖ महाभारते उपदेशकाव्यानि नैकानि उपलभ्यन्ते ।<br>❖ कृष्णोपदेशः, विदुरोपदेशः, भीष्मोपदेशः इत्यादि उपदेशानां विषये ज्ञानप्रदानम् ।<br>❖ यक्षप्रश्नद्वारा छात्राः धर्मसम्बद्धाः विषयाः के इति अवगच्छन्ति । | ➢ यः धर्मं रक्षति तं धर्मः एव रक्षति इति सोदाहरणं छात्रान् अवगमयेत् अध्यापकः ।<br>➢ यक्षप्रश्नस्य उत्तरम् अदत्वा साहसां कृतवतां भीमादीनां का गतिः जाता इति छात्रान् बोधयेत् । | ▪ धर्मः कथम् अस्मान् रक्षति ?<br>▪ यक्षप्रश्नस्य कथां स्ववाक्यैः लिखत । |
| | क्रियाकलापः–3 | ❖ किन्नु हित्वा अपि सुखी भवति नरः ?<br>❖ आतुरस्य किं मित्रम्? इत्यादि– विषयान् वर्णनं कृत्वा विषये आसक्तिम् अभिरुचिम् उत्पादयेत् ।<br>❖ धर्मराजस्य माद्रिविशये अपि निर्व्याजप्रीतिम् अध्यापकः प्रदर्शयति। | ➢ श्लोकानाम् अर्थं कथाद्वारा अवगमयेत् ।<br>➢ धर्मराजस्य धर्मबुद्धि–निर्व्याजप्रीतिविषये छात्रान् प्रेरयेत् । | ▪ कः व्याधिः अनन्तकः?<br>▪ धर्मराजस्य व्यक्तित्वं स्वभाषया लिखत । |
| | क्रियाकलापः–1 | **प्रबन्धः–** । | ➢ गणराज्योत्सवः, | ▪ दूरदर्शनम् अस्मिन् |

| | | | | |
|---|---|---|---|---|
| | | ❖ प्रकृष्टैः वाक्यैः बध्यते विषयः इति प्रबन्धः ।<br>❖ प्रबन्धरचना अपि एका कला इति जानन्ति ।<br>❖ प्रबन्धः वाचकस्य सन्तोषं जनयेत् ।<br>❖ पठने रुचिम् उत्पादयेत् इति छात्राः अधिगच्छन्ति ।<br>❖ प्रबन्धे विषयप्रस्तावः, विषयनिरूपणम् उपसंहारः इत्यादि अंशाः भवन्ति ।<br>❖ प्रबन्धः नाति दीर्घः भवेत् इत्यादीन् अंशान् छात्राः अवगच्छन्ति । | जनसङ्ख्यास्फोटः इत्यादीन् विषयान् अधिकृत्य सोपानैः प्रबन्धं कथं रचयेत् इति अचार्यः उपदिशति ।<br>➢ लघुविषयान् स्वीकृत्य प्रबन्धरचनायां छात्रान् निपुणान् कारयेत्।<br>➢ छात्राः आचार्यप्रेरणया प्रबन्धरचना कौशलं प्राप्य स्ववाक्यैः प्रबन्धं रचयेयुः।<br>➢ देशरक्षणम् सम्पन्नम् इति श्रुत्वा अतीव हृष्टा भवति। | विषयम् आश्रित्य लघुप्रबन्धं लिखत ।<br>▪ स्त्रीशिक्षणम् अस्मिन् विषये प्रबन्धं लिखत । |
| | **तृतीयसप्ताहः**<br>**(3rd week)**<br>क्रियाकलापः–1 | **गद्यम् – वेदगणितज्ञः**<br>❖ वेदोऽखिलोधर्ममूलम् समेषां ज्ञानानां मूलं वेदः एव इति अवगच्छन्ति ।<br>❖ वेदोक्त–आचाराः विज्ञानमूलाः ।<br>❖ वेदाः, संहिता, ब्राह्मणम्, आरण्यकम्, उपनिषत् इति विभक्ताः सन्ति । एतान् अंशान् छात्राः अवगच्छन्ति । | ➢ वेदे वैज्ञानिकविषयाः अपि अन्तर्भवति इति दृष्टान्तानुसारं कुर्यात् ।<br>➢ मानवस्य जीवने वेदोक्ताः विचाराः आचाराः च ये सन्ति ते तस्य अभ्युदये नितरां सहायकाः वैज्ञानिकाः अपि सन्ति ।<br>➢ वेदः इत्युक्ते ज्ञानमेव । तत्र बहुधा विभागः कृतः । तत्र संहितादयः अपिअ सन्ति ।<br>➢ छात्राः कति वेदाः ? विभागाः कथं क्रियन्ते इति बहु श्रुतैः प्रयतन्ते । | ▪ ज्ञानमूलं वेदाः कथम् ?<br>▪ गणितक्षेत्रे भारतीयानां योगदानं किम् ? |
| | क्रियाकलापः–2 | ❖ वेदेषु प्रोक्ताः गणितविचाराः बहवः सन्ति । तेषां निर्वचनं लीलावत्यादि ग्रन्थेषु प्रदर्शिताः ।<br>❖ इदानीन्तनः वेदगणितज्ञःश्रीभारती | ➢ लीलावतीत्यादि गणितग्रन्थानां विषये किञ्चित् बोद्धव्यम् ।<br>➢ श्रीश्री भारतीकृष्णतीर्थ – स्वामिनां विषये स्वानुभवं प्रकटयेयुः छात्राः । | ▪ भारतीयगणितज्ञानां नामानि लिखत ।<br>▪ गाणितीयग्रन्थानां नामानि लिखत । |

| | | | | |
|---|---|---|---|---|
| | | – तीर्थकृष्ण<br>❖ वेदोक्त–आचाराः विज्ञानमूलाः ।<br>❖ वेदाः, संहिता, ब्राह्मणम्, आरण्यकम्, उपनिषत् इति विभक्ताः सन्ति । एतान् अंशान् छात्राः अवगच्छन्ति । | | |
| | क्रियाकलापः–3 | ❖ वेदगणितस्य षोडशमुख्यसूत्राणि सन्ति ।<br>❖ तानि आधृत्य अति सुलभेन गणनाकर्तुं शक्यते इति अवगच्छन्ति । | ➢ सूत्राणि अनुसृत्य गणनां कृत्वा सौलभ्यस्य विषये स्वाभिप्रायं छात्राः प्रकटयेयुः । | ▪ एकं सूत्रम् स्वीकृत्य दृष्टान्तानुगुणं सूत्रस्य विवरणं कुर्वन्तु । |
| | **चतुर्थः सप्ताहः (4th week)**<br>क्रियाकलापः–1 | **व्याकरणम् – छन्दः**<br>❖ पिङ्गलाचार्यस्य छन्दश्शास्त्रस्य विअवरणम् ।<br>❖ लघुचिह्नम्– '᧐'<br>गुरुचिह्नम् – '–'<br>❖ गुरुः भवति–<br>❖ दीर्घस्वरः, दीर्घस्वरयुक्तव्यञ्जनम्। अनुस्वारयुक्तस्य, विसर्गयुक्तस्य, संयुक्ताक्षरस्य, व्यञ्जनाक्षरस्य च पूर्वाक्षरम् गुरुचिह्नं प्राप्नोति ।<br>❖ पदान्तस्य ह्रस्वस्वरः अपि गुरु चिह्नं प्राप्नोति । | ➢ श्लोकपादं दत्वा लघु–गुरुचिह्नं दातुं प्रबोधयेत् ।<br>➢ छात्राः लघुगुरुज्ञानं प्राप्य प्रस्तारं लिखेयुः।<br>➢ हृस्वः अपि कदा गुरुः भवति इति अधिगच्छन्ति । | ▪ श्लोकपादं स्वीकृत्य अक्षराणाम् उपरि लघु–गुरुचिह्नं लिखेयुः ।<br>▪ गणविभागं कृत्वा गणानां नामानि लिखेयुः। |
| | क्रियाकलापः–2 | ❖ त्रयाणाम् अक्षराणां समूहः गणः भवति ।<br>❖ अष्टौ गणाः सन्ति ।<br>❖ 'यमाताराजभानसलगम्' इदं गणसूचकम् वर्तते । | ➢ पादस्य अर्थं जानन्ति ।<br>➢ पादे अक्षराणां विन्यासः अवगम्यते ।<br>➢ इन्द्रवज्राछन्दसः लक्षणं जानन्ति।<br>➢ प्रस्तारं विलिख्य | ▪ प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मनः । अस्य पादस्य प्रस्तारं विलिख्य गणविभागं कुरुत ।<br>▪ यगणः, भगणः नगणः |

| | | | | |
|---|---|---|---|---|
| | | ❖ यगणः, रगणः, तगणः, भगणः,जगणः,सगणः, मगणः,नगणः इति अष्टौ गणाः सन्ति ।<br>❖ अक्षरछन्दः मात्राछन्दश्चेति द्विविधौ। | गणविभागं कुर्वन्ति ।<br>➢ छन्दसः नियमान् अवगच्छन्ति । | एतेषां गणचिह्नं लिखत। |

**अभ्यासपत्रिका –1. सौभद्रोग्रहणं गतः, अनुवादः प्रबन्धश्च ।**

**सूक्त–उत्तरं चित्वा लिखत –**

1. 'पञ्चरात्रम्' इति ग्रन्थस्य कर्ता एषः ।

A. व्यासः B. भारविः C. भासः D. बाणः

2. अर्जुनस्य पुत्रः एषः ।

A. अभिमन्युः B. घटोत्कचः C. उत्तरः D. प्रद्युम्नः

3. अर्जुनः– पार्थः :: वृकोदरः – अत्र चतुर्थपदं भवति ।

A. सहदेवः B. धर्मरायः C. नकुलः D. भीमः

4. देवकीपुत्रः एषः अस्ति ।

A. नन्दगोपः B. अर्जुनः C. केशवः D. कर्णः

5. धर्मरायः अस्मिन् वेशे विराटस्य आस्थाने आसीत् ।

A. ब्राह्मणः B. बृहन्नला C. गोपालक D. सैनिक

**1. एकवाक्येन उत्तरं लिखत ।**

1. उत्तरकुमारस्य रथं कः वाहितवान्?
2. अभिमन्युः कथं गृहीतः?

**2. वाक्ये योजयत ।**

1. दृष्ट्वा – अहं चित्रं दृष्ट्वा सन्तुष्टः अभवम् ।
2. स्मरन् – अहं गीतं स्मरन् अस्मि ।
3. प्रविश्य – अहं देवालयं प्रविश्य देवं नमामि ।
4. दिष्ट्या – मनुष्यः दिष्व्या किमपि भवितुं शक्नोति ।

**3. पर्यायपदं लिखत ।**

1. उत्सिक्तः = 2. भुजः = 3. निग्रहः= 4. वृकोदरः =

**4. विरुद्धार्थकपदं लिखत ।**

1. दुर्बलः x 2. श्लाघ्यः x 3. परः x 4. निष्क्रम्य

**5. यथा निर्देशं लिखत ।**

1. किं भवान् मध्यमः तातः? तस्यैतत् सदृशं वचः ।

   कः पाठः?　　　कः अवदत्?　　　सः मध्यमः तातः कः ?

2. रथमासाद्य निःशङ्कं बाहूभ्याम् अवतारितः ।

   कः पाठः?　　　कः अवतारितः?　　　केन अवतारितः?

3. सहजौ मे प्रहरणम्।

   कः पाठः?　　　कम् अवदत्?　　　कस्य भुजौ सहजौ प्रहरणम्?

**6. लघूत्तरं लिखत ।**

1. प्रवृत्तिपुरुषाः शत्रूणां वृत्तान्तं कथं कथयन्ति?
2. सौभद्रः कथं ग्रहणं गतः?

**7. दीर्घम् उत्तरं लिखत ।**

1. बृहन्नला – अभिमन्योः सम्भाषणं संगृह्य लिखत ।

**8. मञ्जूषातः पदं चित्वा प्रबन्धं लिखत　　　　स्वातन्त्र्योत्सवः**

भारतीयाः वयमिदानीम् ------ निवसामः । क्रि.श.1947 तमे वर्षे ------ पञ्चदशदिनाङ्के अस्माकं राष्ट्रं भारतं ------ अभवत् । ततः पूर्वम् आङ्ग्लाः द्विशतं वर्षाणि यावत् अस्माकं ------ प्रशासनं कृतवन्तः । भारतीयेभ्यः असहनीयं ------ दत्तवन्तः । अतः भारतीयाः तेषां ------ आन्दोलनमेव कृतवन्तः । तस्य ------भारतीयाः आङ्लशासनात् विमुक्ताः अभवन् । अस्य स्वातन्त्र्यदिनस्य ------ वयं प्रतिवर्षम् उत्सवम् आचरामः । देशे ------सर्वकारीयकार्यालयेषु, शालासु, ------ च वैभवेन उत्सवमिमम् आचरन्ति । स्वातन्त्र्यसङ्ग्रामे ------------ प्राणार्पणं कृतवन्तः, ये च क्लेशं प्राप्तवन्तः तेषां स्मरणं ------ च कुर्वन्ति । विविधकार्यक्रमान् आयोजयन्ति । ------देशभक्तानां च सन्देशान् पुनः स्मरन्ति ।

अस्मिन् दिने राष्ट्रध्वजस्य राष्ट्रगीतस्य च ------ समर्पयन्ति । स्वातन्त्र्यवीराणां साहसं ------ प्रसारयन्ति । इदानीं स्वतन्त्रभारतस्य ------ अस्माभिः करणीया। कीर्तिः प्रसारणीया । ------ अस्माकं जीवनं धन्यं भविष्यति । वन्दे भारतमातरम् । ------

| | | | | | |
|---|---|---|---|---|---|
| 1. ये देशभक्ताः | 2. स्वतन्त्रम् | 3. देशस्य | 4. कष्टं | 5. स्वातन्त्र्यवीराणां | 6. विरुद्धम् |
| 7.गौरवं | 8. परिणामात् | 9. सर्वत्र | 10. स्वतन्त्रभारते | 11. स्तुतिं | 12. सार्वजनिकाः |
| 13.अगस्त्मासस्य | 14. तदैव | 15. स्मरणार्थं | 16. सम्पर्कमाध्यमेषु | 17. प्रगतिः | |

**9. मातृभाषायाम् अनुवादं कृत्वा लिखत ।**

1. नीलमेघः आकाशे सञ्चरति । मेघात् वृष्टिः भवति । वृष्ट्या भूमौ सस्यानि वर्धन्ते । पशवः सस्यानि भक्षयित्वा जीवन्ति ।

2. युष्माभिः सम्यक् अभ्यासः करणीयः । गुरोः मार्गदर्शनम् अनुसरत । श्वः शालायां परीक्षा प्रचलिष्यति । सम्यक् लिखित्वा उत्तीर्णाः भवत । उद्योगिनं पुरुषसिंहम् उपैति लक्ष्मीः ।

3. कृषीवलाः क्षेत्रे परिश्रमेण कृषिकार्यं कुर्वन्ति । तेषां गृहेषु कुक्कुटाः, सारमेयाः, गावः, च भवन्ति । शुनकः गृहं क्षेत्रं च चोरेभ्यः रक्षति । धेनुः मधुरं दुग्धं ददाति ।

4. आगामिवासरे सुधांशुः वैद्यकीयक्षेत्रे उन्नताध्ययनार्थं विदेशं प्रति गमिष्यति । तत्र वर्षत्रयं सम्यगधीत्य पुनरागमिष्यति । प्रतिग्रामं गत्वा आर्तान् सेविष्यते । यतः सेवा हि परमो धर्मः ।

**10. संस्कृतभाषायाम् अनुवादं कृत्वा लिखत ।**

1. ವಿದ್ಯಾರ್ಥಿಗಳು ಪ್ರತಿದಿನ ಶಾಲೆಗೆ ಹೋಗುತ್ತಾರೆ. ಶಾಲೆಯಲ್ಲಿ ಅಧ್ಯಾಪಕರು ಪಾಠಗಳನ್ನು ಮಾಡುತ್ತಾರೆ. ವಿದ್ಯಾರ್ಥಿಗಳು ಗುರುಗಳ ಮಾರ್ಗದರ್ಶನವನ್ನು ಅನುಸರಿಸುತ್ತಾರೆ. ಜೀವನದಲ್ಲಿ ಸಫಲತೆಯನ್ನು ಪಡೆಯುತ್ತಾರೆ.
2. ಇದು ಸುಂದರವಾದ ಲಾಲ್‌ಬಾಗ್ ಉದ್ಯಾವನವಾಗಿದೆ. ಇದು ಕ್ರಿ.ಶ.18ನೇ ಶತಮಾನದಲ್ಲಿ ನಿರ್ಮಾಣವಾಯಿತು. ಬೆಳಿಗ್ಗೆ ಹಾಗೂ ಸಂಜೆ ನಗರವಾಸಿಗಳು ಇಲ್ಲಿ ಸಂಚರಿಸುತ್ತಾರೆ. ವಿಶ್ರಾಂತಿಯನ್ನು ಆರೋಗ್ಯವನ್ನು ಆನಂದವನ್ನು ಪಡೆಯುತ್ತಾರೆ.
3. ಹಿಂದೆ ಬಡವನೂ ಮೂರ್ಖನೂ ಆದ ಕಮಲಾಕರನೆಂಬ ಬಾಲಕನು ಇದ್ದನು. ಎಲ್ಲರೂ ಅವನನ್ನು ನೋಡಿ ಅಪಹಾಸ್ಯ ಮಾಡುತ್ತಿದ್ದರು. ಇದರಿಂದ ಅವಮಾನಿತನಾದ ಅವನು ಕಾಶಿಗೆ ಹೋಗಿ ಚೆನ್ನಾಗಿ ಓದಿ ಮಹಾಜ್ಞಾನಿಯಾದನು. ಆದ್ದರಿಂದ ಪ್ರಯತ್ನ ಪಟ್ಟರೆ ಅಸಾಧ್ಯವಾದುದು
ಯಾವುದೂ ಇಲ್ಲ.
4. ಪ್ರಿಯ ವಿದ್ಯಾರ್ಥಿಗಳೇ, ಪ್ರತಿದಿನವೂ ನೀವು ಚೆನ್ನಾಗಿ ಓದಿ, ಕಾಲಹರಣ ಮಾಡಬೇಡಿ. ಹೋದ ಸಮಯ ಮತ್ತೆ ಬಾರದು. ಸುಖವನ್ನು ಬಯಸುವವನು ವಿದ್ಯೆಯನ್ನು ಬಿಡಬೇಕು. ವಿದ್ಯೆಯನ್ನು ಬಯಸುವವನು ಸುಖವನ್ನು ಬಿಡಬೇಕು.

*********

**अभ्यासपत्रिका–2– वेदगणितज्ञः, छन्दः च । पूरकपाठः–3. धर्मो रक्षति रक्षितः ।**

**सूक्तोत्तरचयनप्रश्नाः–**

1. कालिदासः –कविः :: आर्यभटः– --- अत्र चतुर्थपदं भवति ।

A. गणितज्ञः B. शिक्षणज्ञः C. वेदज्ञः D. शास्त्रज्ञः

2. सह योगे – तृतीया विभक्तिः :: नमः योगे – --- अत्र चतुर्थपदं भवति ।

A. प्रथमाविभक्तिः B. द्वितीयाविभक्तिः C. तृतीयाविभक्तिः D. चतुर्थीविभक्तिः

3. राष्ट्रियविद्यालयः अत्र आसीत् ।

A. हैद्रबाद्नगरे B. राजमहेन्द्रिनगरे C. मुम्बयीनगरे D. पुरीनगरे

4. गोवर्धनपीटः अत्र विराजते ।

A. काञ्चीनगरे B. शृङ्गेरीनगरे C. पुरीनगरे D. द्वारकानगरे

5. वेङ्कटरमणः अस्मिन् वर्षे सन्यासाश्रमं स्वीकृतवान् ।

A. 1919 B. 1920 C. 1925 D. 1958

6. प्रसिद्धेषु गणितज्ञेषु एषः अन्यतमः ।

A. वाग्भटः B. वराहमिहिरः C. व्यासः D. नरसिंहभारती

7. 'पिङ्गलाचार्य' अस्य शास्त्रस्य प्रवर्तकः अस्ति ।

A. व्याकरणशास्त्रस्य B. अलङ्कारशास्त्रस्य C. न्यायशास्त्रस्य D. छन्दश्शास्त्रस्य

8. छन्दश्शास्त्रे एते गणाः सन्ति ।

A. सप्त B. अष्टौ C. नव D. दश

9. 'अनुष्टुभि' प्रतिपादं एतानि अक्षराणि सन्ति ।

A. एकादश B. अष्टौ C. द्वादश D. दश

10. अनुस्वाराक्षरस्य पूर्वाक्षरं भवति ।

A. अक्षरछन्दः B. मात्राछन्दः C. गुरुः D. लघुः

**1. एकवाक्येन उत्तरं लिखत ।**

1. शून्यान्वेषणप्राज्ञाः के?
2. श्रीभारतीकृष्णतीर्थस्वामिमहाभागः किमिति प्रसिद्धःअभवत् ?
3. वेदगणितस्य कः ग्रन्थः आङ्ग्लभाषायां लभ्यते ?
4. वेङ्कटरमणं मद्रास् संस्कृतसङ्घः केन उपाधिना सत्कारम् अकरोत् ?
5. प्राचीनकाले प्रसिद्धाः गणितज्ञाः के?

**2. लिङ्गविभक्तिवचनानि लिखत ।**

1. एतस्य 2. पित्रा 3. गुरोः 4. मनसि

**3. लकारपुरुषवचनानि लिखत ।**

1. अकथयत् 2. विराजते 3. आसन् 4. प्रभवामः =

**4. सन्धिं विभज्य नाम लिखत ।**

1. भारतादेव 2. वेदेष्वन्तर्गतः 3. यतिश्रेष्ठोऽयम् 4. शृङ्गगिरावेव

**10. दीर्घम् उत्तरं लिखत ।**

1.श्रीवेङ्कटरमणसरस्वतीमहोदयस्य विद्याभ्यासविषयं विवृणुत ।
2. श्रीवेङ्कटरमणसरस्वतीमहोदयः सन्न्यासाश्रमस्वीकारानन्तरं किं किम् अकरोत्?
3. यक्षधर्मराजयोः सम्भाषणसारं सङ्गृह्य लिखत ।

**11. अधोदत्तानां श्लोकपादानां प्रस्तारं विलिख्य गणविभागं लिखत ।**

अयि गिरिनन्दिनि नन्दितमेदिनि विश्वविनोदिनि नन्दनुते ।

***********

## प्रश्नपत्रिका–

**Max. Marks : 10**

**1. सूक्त–उत्तरं चित्वा लिखत –** (5)

1. कालिदासः –कविः :: आर्यभटः– --- अत्र चतुर्थपदं भवति ।

A. गणितज्ञः B. शिक्षणज्ञः C. वेदज्ञः D. शास्त्रज्ञः

2. सह योगे – तृतीया विभक्तिः :: नमः योगे – --- अत्र चतुर्थपदं भवति ।

A. प्रथमाविभक्तिः B. द्वितीयाविभक्तिः C. तृतीयाविभक्तिः D. चतुर्थीविभक्तिः

3. राष्ट्रियविद्यालयः अत्र आसीत् ।

A. हैद्रबाद्नगरे B. राजमहेन्द्रिनगरे C. मुम्बयीनगरे D. पुरीनगरे

4. ‘अनुष्टुभि’ प्रतिपादं एतानि अक्षराणि सन्ति ।

A. एकादश B. अष्टौ C. द्वादश D. दश

5. अनुस्वाराक्षरस्य पूर्वाक्षरं भवति ।

A. अक्षरछन्दः B. मात्राछन्दः C. गुरुः D. लघुः

**2. दशवाक्यैः उत्तरं कन्नड–आङ्ग्ल–संस्कृतभाषया वा लिखत ।** (3)

यक्षधर्मराजयोः सम्भाषणसारं सङ्गृह्य लिखत ।

----------------------------------------------------

----------------------------------------------------

----------------------------------------------------

----------------------------------------------------

----------------------------------------------------

----------------------------------------------------

----------------------------------------------------

----------------------------------------------------

----------------------------------------------------

----------------------------------------------------

----------------------------------------------------

**3. प्रस्तारं विलिख्य गणविभागं लिखत ।** (2)

1. अयि गिरिनन्दिनि नन्दितमेदिनि विश्वविनोदिनि नन्दनुते ।

*************